National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(67): 38 -40
© 2026 NJHSR
www.sanskritarticle.com

**Madhu Sudan Saha**
Research Scholar,
National Sanskrit University,
Tirupati.

**Correspondence:**
**Madhu Sudan Saha**
Research Scholar,
National Sanskrit University,
Tirupati.

# देवीदानवीयकाव्ये रसध्वनिविवेकः

**Madhu Sudan Saha**

काव्ये वस्तुध्वनिः, अलङ्कारध्वनिः, रसध्वनिः इति त्रिविधोऽपि वर्णनीयो भवति। वस्तुध्वनौ अलङ्कारध्वनौ च ध्वनिः संलक्ष्यक्रमो भवति।

**असंलक्ष्यक्रमद्योतः क्रमेण द्योतितः परः ।**
**विवक्षिताभिधेयस्य ध्वनेरात्मा द्विधा मतः ।।**[1]

**विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः** इति भरतसूत्रे विभावादीनां रसाभिव्यञ्जकत्वक्रमः न लक्षितः भवति। विभावादीनां क्रमेणैव रसाभिव्यक्तौ अपि व्यक्तिक्रमस्तु सूचीशतपत्रन्यायेन न लक्षणीयो भवति। शतपत्रदलसमूहे सूच्या विद्धे एकैकस्मिन् पत्रे पृथक् रन्ध्रं कृत्वा सूची गुच्छे प्रविशति। किन्तु प्रवेशवेगेन भेदनक्रमः यथा न लक्षितो भवति तथा प्रविशति इत्यर्थः। तदुक्तं ध्वनिकृता न तु विभावानुभावव्यभिचारिण एव रसः अपि तु रसः तैः इति अस्तिक्रमः स तु लाघवान् न लक्ष्यते, ततः रसादयः असंलक्ष्यक्रमध्वनेः विषयाः भवन्ति।

**रसभाव तदाभास भावशान्त्यादिरक्रमः ।**
**ध्वनेरात्माङ्गिभावेन भासमानो व्यवस्थितः ।।**[2]

**अक्रमः – असंलक्ष्यक्रमः।**

**वीरोरसः**

देवीदानवीयकाव्ये केवलं तृतीये वर्णके एव वीरोरसः वर्णितः। शतं श्लोकाः वर्तन्ते तत्र एकदेशमात्रे वर्णितस्य रसस्य कथं प्राधान्यमिति शङ्का न करणीया। यथा भवननिर्माणे कुड्यादीनां प्राधान्ये मूलस्तम्भप्रतिष्ठा, कुड्यादीनां स्थिति सम्पादिका यथा आदौ भवति तथैव वीररसोपस्कारिका सामग्री पूर्व वर्णद्वये निरूपिता। काव्यादादेव प्रतिनायकस्य पाराक्रमवर्णनं दृष्टम्।

महिषः लब्धप्रतिष्ठः देवान् बबाधे, हरिहरौ अपि तस्मात् भीतौ तद्वर्णने कविः माघकविम् अनुकृतवान् इति प्रतिभाति। विष्णुरपि तस्मात् प्राप्तपराजयः चञ्चलाः अपि श्रीः तस्मिन् स्थैर्यं प्राप्तवती इति वर्णनं माघकाव्यादेव गृहीतं प्रतिभाति।

**समिदजिरे वक्रान्तः करणनता येन विष्णुरेव क्रान्तः।**
**भियमजगवहस्तस्य व्यधत्त यो विघटितेषु निवहस्तस्य।।**
**रणभुवि भूयो जयतः पराजयेम प्रतीपमपि योजतः।**
**चपलापि रमा यस्य स्थैर्यमगादुरसि विपलतरमायस्य।।**[3]

विष्णोः पाराजयः यथा माघकाव्ये –

**बृहच्छिलानिष्ठुरकण्ठघट्टनाद्विकीर्णलोलाग्निकरणं सुरद्विषः।**
**जगत्प्रभोरप्रसहिष्णु वैष्णवं न चक्रमस्याक्रमताधिकन्धरम्।।**[4]

एवं लक्ष्म्याः रावणे स्थैर्यं यथा माघकाव्ये एव ।

**दिशामधीशान् चतुरो यतः सुरानपास्य तं रागहृताः सिषेविरे।**

**अवापुरारभ्य ततश्चला इति प्रवादमुच्चैरयशस्करं श्रियः ।।**[5]

महिषासुर कृतव्यथया देवेषु भयस्य प्रथमावतारोऽभूदिति देवीदानवीयकाव्ये यद्वर्णितं तस्य निदानभूतो भावः माघकाव्ये दृष्टः। शङ्करकवेः श्लोको यथा –

**महिषीव मदा येव श्रीरनुभूता जितारिसमुदायेन ।**
**यः सरणीं प्रथमानां प्रारेभे विबुधपतिभियां प्रथमानाम् ।।**[6]

माघे यथा –

**समत्सरेणासुर इत्युपेयुषा चिराय नाम्नः प्रथमाभिधेयताम्।**
**भयस्य पूर्वावतरस्तरस्विना मनस्सु येन द्युसदा न्यधीयत ।।**[7]

एवं माघकाव्येऽपि यथा वीररसप्राधान्य प्रतिपत्तये प्रतिनायक दौर्जन्यस्य वर्णनं काव्यादौ कृतम्। तथा देवीदानवीयकाव्ये वीररसं प्रतिष्ठापयितुं महिषपराक्रम वर्णनं कृतमिति अनुसन्धेयम्। नैषदोषः रिपोः पराक्रमादि वर्णने कृतेपि तज्जयात् नायकोत्कर्षः भवतीति आलङ्कारिक समयः यदाहुः –

**वंशवीर्यप्रतापादि वर्णयित्वा रिपोरपि।**
**तज्जयान्नायकोत्कर्ष कथनं च चिनोति सः।।**[8] **इति**

दशरूपके स्पष्टम्। ततः ब्रह्माणं शरणं गताः देवाः तदाज्ञया हरिहरौ शरणं गताः ताभ्यां प्रचोदिताः देवीं शरणं ययुः। द्वितीयवर्णके – देवैः कृता देवीस्तुतिः तेषां भक्तेः आर्तेश्च निरूपिका। तैः प्रार्थिता देवी महिषं हन्तुं कृतनिश्चया तेभ्यः अभयं ददौ।

**निरस्तनिखिलापाये चिरन्तनि कलाप्रिये ।**
**त्राहि नो दुर्बलान्माये महिषादुज्ज्वलाशये ।।**
**देवैरित्यर्चिता श्यामा स्तवैर्नित्यश्रितागमा ।**
**ददावभयमुद्दामा सदा शुभसमुद्यमा ।।**[9]

एवं प्रथमवर्णकद्वये वीररसानुकूला विभावादि सामग्री सिद्धा ।

**विभावादि सामग्री**

द्वितीयवर्णकारम्भे देवैः दृष्टा देवी एव वीररसस्य आलम्बनविभावः तस्याः वर्णनं स्तुतिरूपेण पञ्चविंशति अधिकैः श्लोकैः कृतम्। विशेषतः सा " रक्षो दमनोद्धुरा "इति देवैः आश्रिता -

**रवीन्दुनयनोदारा देवी जनमनोहरा।**
**पुरस्तादस्तु नो धीरा सा रक्षोदमनोद्धुरा।।**[10]

**उद्दीपनविभावः**

देवाः महिषं हन्तुम् एकैकशः असमर्थाः अपि सर्वेषां तेजसां मेलनेन कापि संघटिता शक्तिः सम्पद्यते। ततो वासवादयः देव्यै स्वतेजांसि आयुधानि च ददुः। अपि च वनितया एव राक्षसः वध्यः इति ब्रह्मणः वाक् देवी च वनिता इति निश्चय प्राप्तिः उद्दीपनविभावो भवति।

**वसति हृदयमध्ये या वशिनामविकल्पयोगनियमध्येया।**
**निकृतनिशाचरमाया नगेन्द्रतनया च भारती च रमा या।।**[11]

**स्वायुधानि ततो देवाः श्रीयुतानि श्रितोत्सवाः।**
**दधुर्नेत्र्यै नतग्रीवाः साधुगात्र्यै कृतस्तवाः।।**
**सत्रिशूलगदा शूरा चापाशुगधृतादरा ।**
**तोत्त्रिणी लसदाकारा सपाशा गर्हितासुरा ।।**[12]

**अनुभावाः**

तृतीयवर्णके देवीदानवयोः अन्योन्याधिक्षेपः अनुभावः

**जनितप्रतिविद्युदसौ द्युतल श्रितया प्रभया विकलेतरया ।**
**वरवर्धितविक्रम वक्रमते क्रमते युधि ते विषये वनिता ।।**
**इह दुर्जन गर्ज न तर्जय वा जय वा श्रय वा गहनं दुरितम् ।**
**परिपक्ष्य पुरस्तव निस्तमसं प्रमदामरिदारणचापहराम् ।।**[13]

एवं विभावानुभावसञ्चारिभिः परपुष्टः देव्याः उत्साहः सर्गान्ते राक्षसवधेन परया काष्ठया अभिव्यक्तः।

**ततोऽसौ शर्वाणी चरणमुरसि न्यस्य नाकस्य शत्रो-**
**स्तमेणाङ्कज्योतिर्घटितमुकुटा निघ्नती वेपमानम्।।**
**शुनासीरश्लाघावचनमुदिता दैत्यदौर्बल्यदूती –**
**बभावास्यच्छायाविजितमुकुरश्रीः सुधान्धः परीता।।**[14]

**भक्तिरसः**

भरतेन अष्टावेव रसाः अङ्गीकृताः आनन्दवर्धन मम्मटाजिभिः नवमः शान्तः रसः अङ्गीकृतः। A.D. द्वादशशतकादारभ्य जयदेवादयः भक्तेः प्रचारं कृतवन्तः तदानीमेव रूपगोस्वामी **भक्तिरसामृतसिन्धु**नामकं लक्षणग्रन्थं रचयित्वा इतरे सर्वे रसाः लौकिक भावाश्रिताः यदि रसत्वं प्राप्तुमर्हाः तदा अलौकिक भगवन्निष्ठा रतिः कथं रसत्वं न प्राप्नोति इति बहुधा पर्यनुयोगं कृत्वा भक्तिरसं पृथग् रसरूपेण स्थापितवान्। विशेषेण A.D. षोडशशतके मधुसूदनसरस्वतिः भगवद्भक्तिरसायनं, उज्वलनीलमणिं च रचयित्वा भक्तेः रसत्वं द्रढीकृतवान् । यद्यपि ते सर्वे लाक्षणिकाः कृष्णभक्ताः तथापि तैरूक्तं लक्षणं सर्वेषां देवानां विषये साधारणं भवति। तल्लक्षणं तु -

**दृतस्य भगवद्धर्माद्धारावाहिकतां गता ।**
**सर्वेशे मनसो वृत्तिः भक्तिरित्यभिधीयते ।।**[15]

तत्र रसस्य भगवानेव आलम्बनं भक्तिनिष्ठा भक्तिः स्थायिभावः प्रायशः सर्वे भक्ताः निर्व्याजेन भगवद्भक्ताः भवन्ति। भगवानपि तेषु निर्व्याजां करुणामपि दर्शयति। तादृशी भक्तिः साधारणतया दुर्लभा । भगवतस्तु करुणा निर्व्याजा एव, गीतासु अपि भक्तेषु भक्त्याः निष्पत्तेः कारणमपि निरूपितम्।

**चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुना ।**
**आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ।।**[16]

अत्र देवी एव देवता ब्रह्मा हरिहरौ च ज्ञानिनः भक्ताः देवास्तु भयार्ताः महिषासुरवधार्थिनश्च। ज्ञानिनां गुरोरपेक्षा भवति न वा भवति किन्तु भीतानां (आर्तानां ) च कार्यसिद्धये मार्गोपदेशकः गुरुरपेक्षितो भवति। देवेभ्यः आपत्सु त्रिमूर्तयः एव कर्तव्योपदेशकाः भवन्ति , अतः ते एव अत्र गुरवः। महिषात् आपत्सुञाता इति हेतोः देवाः प्रथमं गुरुं शरणं
गताः।गुरवोऽपि तान् योग्ये मार्गेस्थापयामासुः ।

**महिषोऽस्मानवमनुते लब्धाः स्मो येन धाम वासवमनु ते।**
**स खलु वरं परमापत्ततस्त्रिलोकस्य जायते परमापत् ।।**[17]

श्रीमन्नारायणेनापि महिषः जेतुमशक्यः इति आपदः उद्दीपनम् –

**नन्दकभृत्सह तेन स्वयं मुकुन्दोऽपि योद्धुमुत्सहते न।**

**प्रभवतु कथमिह तदयं बुधनिकरो जेतुमीश तमपहतदयम् ।।**[18]

ततो देवी एव अस्माकं शरणमिति त्रिमूर्तीनां वचनं तेषाम् आर्तिनाशकमभूत् तद्वचसा ते देवीं शरणं ययुः। एवं देवी आलम्बनं, भयमुद्दीपनविभावः, हरिहरयोः वचनमनुभावः इति भक्तिरससामग्री सम्पूर्णा। सञ्चारी भावस्तु यथा सम्भवमुन्नेयाः। द्वितीयवर्णके देवैः कृता सर्वापि देवी स्तुतिः भवतेरभिव्यञ्जिका इति भक्तिरसध्वनिः।

**भयानकरसः**

भयं, त्रासः, भीः इत्यादयः बहवो भयपर्यायाः श्रूयन्ते तेषु शब्देषु भयशब्दः स्थायिवाचकः, त्रासशब्दः सञ्चारिभाव निरूपकश्च लक्षणग्रन्थेषु दृष्टः। जगन्नाथस्तु "औत्पत्तिकप्रभवः त्रासः स्वापराधोत्थं" भयमिति भयत्रासयोः भेदं निरूपितवान्। अस्मिन् काव्ये तु सञ्चारी एव त्रासः देवेषु महिषेण दौर्जन्याधिक्य प्रयोगात् भयत्वं प्राप्तः यदाहुः लाक्षणिकाः –

**रत्यादयः स्थायिभावाः स्युर्भूयिष्ट विभावजाः।**

**स्तोकं विभावैरुत्पन्नाः त एव व्यभिचारिणः ।।**[19]

त्रैङ् – पालने इति धातोरेव त्रास, त्राण इत्यादि शब्दाः उत्पन्नाः। देवास्तु महिषात् त्रस्थाः देव्याः अभयप्राप्त्या स्वेषां त्राणामिच्छन्तः देवीं शरणं ययुः।

**निरस्तनिखिलापाये चिरन्तनि कलाप्रिये।**

**त्राहि नो दुर्बलान्माये महिषादुज्ज्वलाशये।।**[20]

भक्तिरसप्रधाने अपि स्तोत्रे भयानकरसस्य अपि प्रतीतः दृष्टैव। किन्तु रक्षिष्यति इति विश्वासेन तां शरणं जग्मुः इति भयमपि स्थायिताम् अर्हति। एवं मुख्ये वीररसध्वनौ भक्तिरसध्वनि भयानकरसध्वनिश्च अङ्गभूतौ देवीदानवीयकाव्ये परिपुष्टौ ।

**पाद टिप्पणी**

[1]ध्वन्यालोकः-2-2

[2]ध्वन्यालोकः - 2-3

[3]देवीदानवीयम्-1-5,6

[4]शिशुपालवधम्-1-54

[5]देवीदानवीयम्-1-44

[6]देवीदानवीयम्-1-11

[7]शिशुपालवधम्-1-43

[8]काव्यादर्शः -1-22

[9]देवीदानवीयम्-2-27,28

[10]देवीदानवीयम्-2-2

[11]देवीदानवीयम्-1-35

[12]देवीदानवीयम्-2-29,30

[13]देवीदानवीयम्-3-30

[14]देवीदानवीयम्-3-13,14

[15]भगवद्भक्तिरसायनम्-1-4

[16]गीता-7-16

[17]देवीदानवीयम्- 1-18

[18]देवीदानवीयम्- 1-21

[19]रसगङ्गाधरः-प्रथमाननम्।

[20]देवीदानवीयम्-2-27